© 2018 IJSRST | Volume 4 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Education

# काव्यशास्त्रेषु रीतिविवेचनम्



**डॉ0 अरविन्द कुमार सिंह**
**अतिथि प्रवक्ता**
**संस्कृत विभाग**
**ईश्वर शरण डिग्री कालेज,**
**इलाहाबाद**

गुणहेतुकः गुणव्यंजकः वर्णविन्यासविशेषो रीतिः कथ्यते। एतदेवोक्तं **'माधुर्याणां व्यंजकाः स्युर्वर्णाश्च रचना अपि**[1] इति गुणा माधुर्यौंजः प्रसादाः गुणनिरूपणे षष्ठकिरणे उक्ताः, वर्णानां रचनाशिषो वर्णविन्यास विशेषः रसानामनुकूलो यो माधुर्यादिगुणस्तस्यानुरोधोपाधिकरचनाविशेष रीति इति कथ्यते। यद्यपि गुणविवेकेनैव स लक्ष्यते तथापि तद्विशेषबोधार्थ रीति आरभ्यते।

**काव्यास्यात्मा रीतिः**

वामनेन रीतिरेव काव्यस्यात्मेति प्रत्यपादि। **'रीतिरात्मा' काव्यस्यः विशिष्टपदरचना रीतिः'**[2] इति रीतिलक्षणमपि प्रत्यपादि। रचनायामियं विशिष्टता गुणल›ाराणामस्थित्योत्पन्ना भवति। अत एव वामनेन काव्यं ग्राह्यमलंकारात् इति लक्षणमभ्यधायि। अलङ्क्रियतेऽनेनति करणव्युत्पत्या यमकोपमादिबोधकः नायमलंकारशब्दः, अपि तु **'अलङ्कृतिलंकारः'** इति भावव्युत्पत्तिनिष्पन्नो दोषहानगुणालंकारोपानकृत् सौन्दर्यपरः 'सौन्दर्यमलंकारः' यद्दोषगुणालंकार हानोपादानाभ्याम् इत्यादिवामनसूत्रं सच्छते। अयमेव वामनो रीतिमतस्य प्रधानाचार्योऽस्ति। तस्मादेव रीतिसम्प्रदायः प्रचारितः।

**रीतिसम्प्रदायः**

वामनस्य काव्यालंकारसूत्रनाम्ना ग्रन्थः स्वोपज्ञवृत्तिसहितः प्रसिद्ध। अस्मिन् ग्रन्थे काव्यात्मरूपेण रीतिरेवायं स्वीकृतः। एतन्मते– 'रीतिरात्मा काव्यस्यं इति लक्षणं प्रतिपादितम्। इयमेव रीतिः शैलीत्युच्यते। रचनायां चेयं विशिष्टता गुणानामवस्थित्या उत्पन्ना भवति। अतएव गुणोपरि रीतिरवलम्बिता तिष्ठति इदं च रीतिमतं गुणसम्प्रदायनाम्नापि व्यहहृतं भवति। **'ओजः कान्तिमयी गौडीया[3] समग्रगुणा वैदर्भी[4] माधुर्यसौकुमार्योपपन्ना पांचाली[5]** वैदर्भीगौडीरीत्योः स्वरूपेण विभेदप्रतिपादनस्य श्रेय आचार्यदण्डिन एवोपरि वर्त्तते। आरम्भकाले रीतीनां सम्बन्धो देशविशेषेणैवासीत्। त्प्रान्तिनो यादृश्यां शैल्यां विशिष्टतां प्राप्तवन्तस्तत्प्रान्तनाम्ना तादृशशैल्याः प्रसिद्धिरभूत्। तत्र वैदर्भ्या वैदर्भदेशेन वराराभिधेन, गौड्या व›प्रदेशेन पांचाल्याः पांचाल (पंजाब) प्रदेशेन लाटया लाट (गुजरात) प्रदेशेनाभिधेयेन सम्बन्ध आसीत्। गुणालंकारयोः परस्परं स्फुटं भेद इत्यस्य सर्वप्राथम्येन प्रतिपादनं वामनेनैव कृतम्।

**श्लेषः प्रसादः समता माधुर्य सुकुमारता।**

**अर्थव्यक्तिरूदारत्वमोजः कान्तिः समाधयः।।**

भरतनाटयशास्त्रप्रतिपादिता य एते दश गुणास्तानेव वामनः शव्दार्थगतत्वेन द्विगुणितानकरोत्। वैदर्भीरीतेः स्पष्टप्रतिपत्तये ओजः कान्तयोः पांचालीप्रतीतये माधुर्यप्रसादयोः सत्ताया विद्यमानत्वावश्यकता प्रदर्शिता। दण्डिनोऽपि वैदर्भमार्गस्य प्राणभूताश्चोक्तदशगुणा इति स्पष्टमुक्तम्।

इति वैदर्भमार्गस्य प्राणा दशगुणा मता।[6]

एवंच गुणालंकारयोः पार्थक्यं प्रदश्र्य रीतिसम्प्रदायेन स्फुटं साहित्यशास्त्रस्य महानुपकारो विहितः। वामनो हि गुणालंकाग्योभेद एवमाह–

**काव्यशोभाया कर्तारो धर्माः गुणाः।**

**तदतिशयहेतवोऽलंकारा।**

अलंकारसम्प्रदायापेक्षया चैतत्सपम्प्रदायस्यालोचनादृष्टिः सूक्ष्मातिगहना च प्रतीता भवति। भामहादयो हि रसमलंकारं मत्वा तं काव्यस्य बहिरऽसाधनमेव स्वीकृतवन्तः। किन्तु वामनेन तु कान्तिगुणान्तर्गतं **(दीप्तिरसत्वं कान्तिः[7])** रसं मत्वा काव्ये रसस्य महत्ता समधिका वर्त्तते इत्यत्र विशेषाग्रहो दर्शितः। ध्वनिश्च वक्रोक्तावेवान्तर्भावितः। इत्थश्च वामनेन कार्यद्वयं सम्पादितम्– 1. काव्यपरिभाषायामात्मनो मुख्यत्वम्, 2. गुणानां मुख्यत्वं प्रयच्छताऽलंकाराणां गौणत्वम्।

शब्दाथौ शरीरं रसश्च तदात्मा, इति स्वीकासदेव वैदर्भ्यादिरीतीनां गुणाश्रितत्वमंगीकृतम्। गुणानामपि रसधर्मत्वमंगीकृत्य तेषां काव्यात्मानः सम्बन्धः स्थापित आचार्यैः। मम्मटाचार्यस्तु वृतिं रीतिश्चैकमेव स्वीकरोति। तथा हि **'एतास्तिस्रो वृत्तयः वामनादीनां मते वैदर्भीगौडीपांचालारव्या रीतियो मताः[8]।**

साधारणतया वृत्तिरीतिषु भेदः कर्तुं न शक्यते तथापि सूक्ष्मेक्षिकया किंचित्पार्थक्यमस्त्येव। तथा हि वृत्तीनां विभाजनं रचनाया गुणोपरि वर्त्तते। रीतीनां वर्गीकरणं देशस्य प्रान्तस्य वाधारेण भवति। यद्यपि गुणैः सह रीतीनां सम्बोन्धोऽस्ति, तथापि तासु रचनायाः बाह्यरूपोपर्येवाधिकाग्रहो दत्तो वर्त्तते। रूय्यकेन भेदमेतदधिकस्पष्टतया प्रदर्शितम्।

**राजशेखरमते रीतिः**

आचार्यराजशेखरेण त्वित्थमत्र निर्दिष्टम् तत्र देशविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः। रितिः। भोजदेवेन तु सरस्वती–कण्ठाभरणे रीतीनां साहित्यमार्गेण–अर्थात् रचनायाः क्रमेण वा सम्बन्धः प्रदर्शितः। रीतिशब्दो हि रीङ्धातुना निष्पन्नः, यदर्थश्च चलनं निर्माणम्। तथा चोक्तम्–

**रीङ्गताविति धातोः सा व्युत्पत्या रीतिरूच्यते।**

तेनैव वृत्तेः सम्बन्धः विकास–विक्षेप–संकोच विस्तारमनोदशाभिः (अर्थात् चित्तोपरि पतितप्रभावैः) रीतीनां सम्बन्धो बाह्यवर्णविन्यासैरधिको वर्त्तते इति प्रदर्शितः। चतुर्विंशतिगुणः सन्ति।

भरतवामनादिभिः शब्दार्थयोः ये दशगुणा उक्ताः मम्मटभट्टपथवर्तिना कविकर्णपूरादिभिस्तु माधुर्यौजः प्रसादेष्वेव तानन्तर्भाव्यगुणानां त्रैविध्यमेव स्थापितम्। साहित्यदर्पणेऽपि गुणाश्च औदार्यादिवत् काव्यात्मभूतरसस्योत्कर्षहेतुभूताः सन्तः स्थायिधर्माः इत्युच्यते। अलंकारा अपि तदुत्कर्षहेतवः सन्ति, किन्तु अस्थायिरूपेणेति तत्र पूर्वमेव प्रदर्शिता इति।

**रीतिविषये आनन्दवर्धनमतम्**

सहृदयानन्दवर्धनः आनन्दवर्धनः पदसंघटनामेव रीतिं मन्यमानाः संघटनां लक्षयति–

**असमासा समासेन मध्यमेन च भूषिता।**

**तथा दीर्घसमासेति त्रिधा संघटनोदिता।।**[७]

अविद्यमानः समासो यस्यां सा वैदर्भीरूपैका, माध्यमेनादीर्घेण समासेन भूषिता च पांचालीरूपा द्वितीया, तथा दीर्घः समासो यस्यां सा गौडीरूपा तृतीयेति त्रिधा त्रिप्रकारा संघटना रीतिः क्रमेणोपनागरिका, कोमला परूषा च वृत्तिर्वा उदिता कथिता। तदुक्तं वामनेन–

**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।**

**विपंचीस्वरसौभाग्या वैदर्भीरीतिरिष्यते।।**

**आश्लिष्टश्लथभावां तु पुराणछाययाऽन्विताम्।**

**मधुरां सुकुमारां च पांचाली कवयो विदुः।।**

**समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्।**

**गौडीयामपि गायन्ति रीतिं रीतिविचक्षणः।। इति।**

मम्मटेनापि चोक्तम्–

**माधुर्यव्यंजकैर्वर्णैरूपनागरिकोच्यते।**

**ओजः प्रकाशकैस्तैस्तु परूषा कोमला परैः।। इति।**

पुनश्च रीतिवृत्त्योरभिन्नत्वं स्वीकुर्वन् कथयति ध्वन्यालोककार आनन्दवर्धनः तदनतिरिक्तवृत्तयो वृत्तयोऽपि या कैश्चिदुपनागरिकाद्याः प्रकाशिता इति। ताभ्यः संकटनाभ्यः अनतिरिक्ताऽभिन्ना वृत्तिर्व्यापारो यासां ताः यद्वा तदनतिरिक्ता इति पाठे वृत्तिविशेषणत्वे च, तदेकरूपाः उपनागरिका परूषा–ग्राम्याख्यास्तिस्रो वृत्तयोऽपि (चारूत्वहेतवः) या कैश्चिद् भट्टोद्भटप्रभृतिभिः प्रकाशिताः, ता अपि श्रवणगोचरं गताः।

**भरतादिमते वृत्तिविमर्शः**

भरतप्रणीतनाट्यशास्त्रप्रसिद्धानां काव्यालंकारान्तरप्रसिद्धानामुपनागरिकाणां वृत्तीनामपि समुल्लेखों मिलति। यथा कैशकीलक्षणं दर्पणे–

**या श्लक्ष्णनेपथ्यविधानचित्रा**

**स्त्रीसंकुला पुष्कलनृत्यगीता।**

**कामोपभोगप्रभवोपचारा**

**सा कैशिकी चारूविलासयुक्ता।। इति।**

सात्त्वतीलक्षणं यथा नाटयशास्त्रे–

**या सत्त्वजेनेह गुणेन युक्ता**

**न्यायेन वृत्तेन समन्विता च।**

**हर्षोत्कटा संहतशोकभावा**

**सा सात्वती नाम भवेत्तु वृत्तिः।। इति**

भारतीलक्षणं यथा तत्रैव–

**या वाक्प्रधाना पुरुषप्रयोज्या**

**स्त्रीवर्जिता संस्कृतवाक्ययुक्ता।**

**स्वनामधेयैर्भरतैः प्रयुक्ता**

**सा भारती नाम भवेत् तु वृत्तिः।। इति।**

आरभटीलक्षणं यथा श्रृंगारतिलके–

**या चित्रयुद्धभ्रमशस्त्रपात–**

**मायेन्द्रजालप्लुतिलांघिताद्या।**

**ओजस्विगुर्वक्षरबन्धगाढा**

**ज्ञेया बुधैः साऽऽरभटीति वृत्तिः।। इति।**

तासामुत्पत्तिश्चोक्तं भरतानुशासने, यथा–

**ऋग्वेदाद् भारती वृत्तिर्यजुर्वेदात्तु सात्वती।**

**कैशिकी सामवेदाच्च शेषा चाथर्वणी तथा।। इति।**

काव्यांलकारान्तरप्रसिद्धानामुद्भटाद्युदीरितानामुपनागरिकापरुषा कोमलानां वृत्तीनामपि समुल्लेखः प्राप्यते काव्यशास्त्रे। तासां क्रमेण लक्षणं यथोद्भटालंकारे–

**सरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः।**

**स्पर्शैर्युतां च मन्यन्त उपनागरिकां बुधाः।। इति।**

परुषालक्षणामुक्तं तत्रैव–

**शषाभ्यां रेफसंयोगैष्टवर्गेण च योजिता।**

**परुषा नाम वृत्तिः स्याद्  ह्याद्यैश्च संयुता।। इति।**

एवमेव कोमलापि प्रतिपादिता तत्रैव–

**शेषैर्वर्णैर्यथायोगं कथितां कोमलाख्यया।**

**ग्राम्यां वृत्तिं प्रशंसन्ति काव्येष्वादृतबुद्धयः।। इति।।**

**गुणरीत्योर्भेदाभेदविमर्शः**

ननु रीत्यनतिरिक्तवृत्तयो वृत्तयः सन्तीति ध्वन्यालोके प्रपञ्चितम्। अथ तृतीयोद्द्योते **'गुणानाश्रित्य तिष्ठती माधुर्यादीन् व्यनक्ति सा'** इति कारिकाव्याख्यावसरे गुणसंघटनैक्यपक्षः प्रतिपादितः। तस्यायमाशयः–धर्मधर्मिणोस्तादात्म्यं भवति। संघटनाधिकरणं धर्मित्वात, गुणत्वाधेयाः धर्मत्वात्। तन्नये गुणाः संघटना चैत्येकं तत्त्वम्। काव्यप्रकाशेऽपि चोक्तम्–

**मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।**

**अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।**[10] **इति।**

मध्यवृत्तिपदेन पांचालीरीतिः, अवृत्तिपदेन वैदर्भीरीतिः। इत्थं रीतिगुणयोरैक्यमापतितम्। रीतिश्च वृत्यनुप्रासभेदः, रीत्यानया विवेचने कृते गुणालंकारयोरपि ऐक्यं सिद्धचतीति वाच्यम्।

**तत्रोच्यते 'माधुर्यव्यंजकैर्वर्णैरूपनागरिकोच्यते'।**

**ओजः प्रकाशकैस्तैस्तु परुषा कोमला परैः।**

**केषांचिदेता वैदभीप्रमुखाः रीतयो मताः ।। इति।**

आभिः कारिकाभिः रीतिवृत्त्यनतिरिक्तत्वं सिध्यतु नाम, न तु गुणरीतीनाम्। यतो हि माधुर्यव्यंजकाः ये वर्णाः, ते उपनागरिका भवति । एतेन माधुर्यगुणः उपनागरिका च रीति एकैवेति वक्तुं न शक्यते। वृत्तयो रीतयोऽपि गुणालंकारव्यतिरिक्ताः। वर्तन्ते अनुप्रासभेदा आस्विति वृत्तयः, तथा च तिस्तोऽनुप्रासजातयो वृत्तय एवं। इत्थं वृत्तिरूपकजातौ, अनुप्रासः जातिः वर्तमानत्वप्रतिपादनमनुपन्नमु। जातौ जातिमतो वर्तमानत्वं विरूद्धम्, वैशेषिकमतविरोधात्। अतः गुणाश्रया संघटना, संघटनाश्रया वा गुणा इत्येव युक्तं प्रतिभाति।

**रीतिभेदाः**

एवं लक्षणलक्षिता रीतिः कतिविधा भवतीति जिज्ञासायाः शान्तये रीतिभेदानाह कविकर्णपूरोऽलंकारकौस्तुभे–

**वैदर्भ्यादिविशेषेण चतुर्धा सा निगद्यते।**

सा रीतिः वैदर्भी पांचाली गौडी लाटीति भेदेन चतुर्विधा निगद्यते। चतुर्धेति कथनेन ये त्रिविधां रीतिं मन्यते तेषां मतस्य निरसनं द्योत्यते। यथा प्रतापरूद्रे **'रीतिर्नाम गुणाश्लिशटपदसंघटना मता'** इत्युक्त्वा सा च रीतिः त्रिधा वैदर्भी गौड़ी पांचाली चेति कथिता। अच्युतरायोऽपि साहित्यसारे रीतिं पुनर्माधुर्यादिव्य×जका त्रिविधामेव क्रमेणोद्दिशति। तद्यथा–

**तत्तद्रसार्हपदसंघटना रीतिरीतिता।**

**वैदर्भी च तथा गौडी पांचाली चेति तत्क्रमात।।**[11]

चन्द्रालोकेऽप्युक्तम्–

**आचतुष्टयमासप्तं यथेष्टैरष्टमादिभिः।**

**समासः स्यात्पदैर्न स्यात् समासः सर्वदापि च।।**

**पांचाली किंच लाटीय गौडीया च यथारसम्।**

**वैदर्भी च यथासंख्यं चतस्रो रीतयः स्मृताः।। इति।**

दर्पणचन्द्रालोकयोलाटरीतेश्चतुर्थ्या उक्तत्वेऽपि तस्या अनतिप्रयोजकत्वं व्याख्यातं **'लाटी तु रीतिवैर्भीपांचाल्योरन्तरा स्थिता'** इति दर्पण एवोक्तत्वात्।

'रीतिरात्मा काव्यस्य' इत्युरीतिसम्प्रदाय प्रतिष्ठापकेन श्रीवामनेनवैदर्भी–गौडी–पांचाल्यस्तिस्रो रीतयः कथिताः। शृंगारप्रकाशकृता श्रीभोजदेवेन षड्रीतय उदुरिताः।

यथा–

**वैदर्भी चाथ पांचाली गौडी चावन्तिका तथा।**

**लाटीया मागधी चेति षोढा रीतिर्निगद्यते।।**

एवं बहुविकल्पेऽपि ग्रन्थकारमतानुसारमेव वैदर्भ्यादिरीतीनां लक्षणादिकमत्र प्रस्तूयते।

**अथ वैदर्भी रीतिः**

रीतीनां लक्षणं वक्तुमभिलषन् प्रथमं वैदर्भी रीतिं लक्षयति कविकर्णपूरः–

**अवृत्तिरल्पवृत्तिर्वा समस्तगुणभूषिता।**

**वैदर्भी सा तु शृंगारे करूणे च प्रशस्यते।।**[12]

अस्यां वैदर्भ्यां केवलासमस्तपदघटितवर्णनमेवोचितम्, अथवा अल्पपदघटि तसमास एव उचितः, न तु बहुपदघटितदीर्घवृतिरिति। माधुर्यौजः प्रसादगुणैर्भूषिता वैदर्भी रीतिर्भवति। तामुदाहरति–

**आलोकनंकुटिलितेन विलोचनेन**

**सम्भाषणंच वचसा मनसार्धमर्धम्।**

**लीलामयस्य वपुषः प्रकृतिस्तवेयं**

**राधे क्रमो न मदनस्य न वा मदस्य।।**[13]

अत्रावृत्तिरल्पवृत्तिश्च वर्तते। ङ्कु–म्भा–ञ्चेति माधुर्यव्यंजका वर्णाः, अर्धमर्धमित्योजो व्यंजकौ वर्णौ, अर्थवैशद्यं प्रसादः, अनिष्ठुरत्वं सुकुमारतेत्यादि समस्तगुणाः सन्त्यत्र, तस्माद् वैदर्भी रीतिः स्पष्टं प्रतिभाति। अस्याः वैदर्भ्याः पाको निर्वाहोऽपि सूचितः कविकर्णपूरेण। यथोक्तम्–

**पाकोऽप्यस्याः सहायः स्यादाम्रवार्ताकुपाकवत्।**

स च पाकः द्विविधो निगद्यते–रसालपाको वार्ताकुपाकश्चेति। रसालपाक एव वैदर्भीरीत्यां सहायः स्यात् शोभाकरत्वात्। नेतरः, अर्थात् रसाल आम्रस्तस्य पाकः एवोत्तरकाले शोभाकरो भवति, नेतरः न वार्ताकुपाकः, वार्ताकोः प्रथमदशायामेव सौन्दर्यम्, पक्वदशायामत्यन्तवैरूप्यात् स न शौभाकरः। पूर्वपूर्वदशायाः सकाशादुत्तरोत्तररम्यता सुन्दरता यदि भवति, तदाम्रपाकः स्यात्। विपरीते पूर्वदशात उत्तरदशायामसुन्दरत्वे तदन्यको वार्ताकुपाकः। अत एवोक्तमलंकारकौस्तुभें–

**पूर्वपूर्वदशायाश्चेदुत्तरोत्तररम्यता।**

**तदा रसालपाकः स्याद्विपरीते तदन्यकः।।**[14]

**'राधे क्रमो न मदनस्य न वा मदस्य'** इति चतुर्थचरणो रसालपाकः। यद्येतादृशचतुर्थचरणस्थाने **'कोपक्रमो नु सहजः किमु कृत्रिमो वा'** इति प्रयुज्यते तदा पूर्वपूर्वचरणापेक्षया चतुर्थचरणस्य रमणीयत्वाभावात्, तस्य वार्ताकुपाकतैव, तस्य वार्ताकुपाकताया विरतत्वमेव। अत्र सत्यामपि वैदर्भ्याः पाकेन वार्ताकुपाकता तेनास्या विरसत्वम्। एवं छन्दोऽप्यस्याः वैदर्भ्याः सहायतां व्यनक्ति, तत्त्व वसन्तलिकोपेन्द्रवस्रादि। आदिपदात् रथोद्भ्तादि च। एषामुदाहरणानि तत्तत एवावलोकनीयानि।

**अथ पांचालीरीतिः**

क्रमप्राप्तां पांचाली लक्षयति कविकर्णपूरोऽलंकारकौस्तुभे—

**कथाप्रायो हि यत्रार्थो माधुर्यप्रायको गुणः।**

**न गाढता न शैथिल्यं सा पांचाली निगद्यते।।**[15]

पांचालीमुदाहरति—

**कान्ते कां प्रति ते बभूव मधुरं सम्बोधनं त्वां प्रति**

**ज्ञातं किं कमनीयतानुगमिदं किं वा प्रियत्वानुगम्।**

**तात्पर्य तु ममोभयत्र न न न भ्रान्तोऽसि नाहं तु सा**

**कासौ या ह्रदये तवास्ति ह्रदये नित्यं त्वमेवासि में।।**

श्लोकस्यास्यार्थोऽवलोकयन्तु सुधियः। मानिनी राधिकां प्रति श्रीकृष्ण आह—हे कान्ते। राधाह—कां प्रति तव सम्बोधनम्? श्रीकृष्ण आह त्वां प्रति। श्रीराधिकाह—कान्ता कमनीया भवति, प्रियापि भवत्यतो मयि कमनीयतानुगं सम्बोधनं किं वा प्रियत्वानुगम्? श्रीकृष्ण आह मम तूभयत्र तात्पर्यम् पुनः श्री राधाह—अहं सा कमनीया न तवा प्रियापि न। श्रीकृष्ण आह—असौ कमनीया प्रिया का? श्रीराधाह—या तव ह्रदयेऽस्ति। श्रीकृष्ण आह—में ह्रदये नित्यं त्वमेवासि।

अत्रार्थः कथाप्रायत्वात् माधुर्यगुणवजकत्वात् अगाढ़त्वत्वात्, अशैथिल्याच्च पांचाली रीतिः स्पष्ट प्रतिभाति।

**अथ गौडी रीतिः**

ततः गौडीरीतिं प्रतिपादयति कविकर्णपूरः–

**निष्ठुराक्षरविन्यासाद् दीर्घवृत्तिर्युतौजसा।**

**गौडी भवेदनुप्रासबहुला वा।।** [16]

यत्र निष्ठुराक्षराणां विन्यासः यत्र दीर्घा वृत्तिः, ओजसा गुणेन युता, तथानुप्रासबहुला गौडी रीतिः भवेत्। अत्र वा शब्दो विशेषणसमुच्चयबोधकः, न तु विकल्पार्थकः। मार्धुर्य्यादिगुणगतानां मध्ये यस्य गुणस्यानुकूलोऽनुप्रासो भवतु, तस्यानुप्रासस्य बाहुल्यमेव गौडी रीतिमनुबध्नाति। अतो **'द्वन्द्वं द्वन्द्वं वादयद् दुन्दुभीनाम्'** इत्यादौ गौडीत्वम्, ओजोगुणव्यंजकत्वात्। किन्तु

**अनंगसंगरासंगे भंगिमेव स जंगमः।**

**संगतीरंगी तन्वंगीसंगी रायंगतो हरिः।।**

इत्यत्र निष्ठुराक्षराणामभावान्न गौडीत्वम्। अतः **'किं रे कष्टमरिष्ट दुष्ट तनुषे गौष्ठस्य नस्तष्ठिरे'** इत्यादौ न केवलं निष्ठुराक्षरप्रायत्वम्, अपि त्वनुप्रासबाहुल्यमप्यस्ति, तस्मादत्र गौडीया रीतिः स्पष्टं प्रतीयते। गौडीयां रीतिमुदाहरित–

**दाक्षिण्यौत्सुकया गुणैरधिकया प्रेम्णा गतालीकया**

**लीलाकेलिपताकया कृतकया चित्कौमुदीराकया।**

**दृक्कर्पूरशलाकया नवकया लावण्यवापीकया**

**कृष्णो राधिकयाऽन्वरंजि न कया जातं निरातंकया।।**[17]

**अथ लाटी रीति :–**

यत्र समन्ततः सर्वत्र लकारादिभिर्मृदुलैर्वर्णैः, यत्रोत्कटं शैथिल्यम्, यत्रानुप्रसानां निर्भरोऽतिशयः वर्तते, तत्र लाटी रीतिर्भवेत्। यथोक्तत्–

**समन्ततः।**

**शैथिल्यं यत्र मृदुवैर्वर्णैर्लादिभिरूत्कटम्।**

**सा लाटी स्याल्लाटजनप्रियानुप्रासनिर्भरा।**[18]

लाटजनप्रियत्वादियं लाटी कथ्यते। लाटो विदग्धः। तां लाटीमुदाहरति–

**लीलाविलासलुलितालनावलीषु**

**लीलालकासु ललितालिरलं ललामम्।**

**कालालकेलिकलयाऽनिलचंचलायाः**

**काले ललौ मृदुलतां लवलीलतायाः।।**[19]

अत्र लाटानुप्रासबाहुल्यात्, लकाराधिक्यात् केवलं शैथिल्याच्च लाटी रीतिः स्फुटं प्रतिभाति। पुनश्चोदाहरति विशेषस्फुटीकरणाय–

**स्मेरारविन्दवदनावदनारविन्द–**

**सौन्दर्यकाम इव शारदाशीतरश्मिः।**

**आकाशवासतपसा सह संविधत्ते**

**धूमस्य पानमिव लक्षणलक्षणस्य।।**[20]

लाटः कोमलः, तथा च कोमलवर्णानुप्रासेऽपि तथा शैथिल्यं ज्ञेयम्। ईषद् विकसितारविन्दतुल्यवदनाया राधाया वदनारविन्दसौन्दर्यकामनाविशिष्ट इव शरत्कालीनचन्द्र आकाशवासरूपतपसा सह धूमस्य पानमिव विधते। कथम्भूतं तस्य लक्षणम्? कलंकरूपचिन्हं तल्लक्षणस्य तत्स्वरूपस्य तथा च चन्द्रः स्वनिष्ठकलंकचिन्हव्याजेन धूपपानरूपं तपश्चकार।

अत्र लाटानुप्रासबाहुल्यात् लाटी रीतिः वर्तते। लाटो देशविशेषः तत्स्थो योजनः कविस्तद्वल्लभत्वात्तत्प्रियत्वाद् अस्यैव संज्ञान्तरं लाटानुप्रासः, एष पदानुप्रास इत्यन्ये मन्यन्ते। तेषां मते तिस्र एव रीतयः भविन्त? अतएव साहित्यदर्पणे श्रीविश्वनाथेनोक्तम्–

**लाटी तु रीतिवैदर्भीपांचाल्योरन्तरा स्थिता। इति।**

एषां प्रयोगविषयं लक्ष्यीकृत्य केनाप्यभियुक्तेन सुष्ठूक्तम्–

**नान्ध्रीपयोधर इवातितरां प्रकाशो**

**नो गुर्जरीस्तन इवातितरां निगूढः।**

**अर्थो गिरामपिहितः पिहितश्च शश्वत्**

**सौभाग्यमेति मरहट्टवाधूकुचाभः।।**

# सन्दर्भ सूची


1. काव्यालंकार सूत्र (1.2.6)
2. काव्यालंकार सूत्र (1.2.7)
3. काव्यालंकार सूत्र (1.2.11)
4. काव्यालंकार सूत्र (1.2.12)
5. काव्यालंकार सूत्र (1.2.13)
6. काव्यादर्श ( 1.42)
7. काव्यालंकार सूत्र (1.2.114)
8. काव्यप्रकाश (9.81 पूर्वार्द्ध वृत्ति)
9. ध्वन्यालोक ( 3.61)
10. काव्यप्रकाश ( 9.80–81)
11. साहित्यसार (7.136)
12. अलंकार कौस्तुभ (9.3)
13. अलंकार कौस्तुभ (9.4)
14. अलंकार कौस्तुभ (9.7)
15. अलंकार कौस्तुभ (9.11)
16. अलंकार कौस्तुभ (9.13)
17. अलंकार कौस्तुभ (9.16)
18. अलंकार कौस्तुभ (9.17)
19. अलंकार कौस्तुभ (9.18)
20. अलंकार कौस्तुभ (9.19)